শ্রীযোগলক্ষ্মীনরসিংহ সুপ্রভাতম্

{॥ শ্রীযোগলক্ষ্মীনরসিংহ সুপ্রভাতম্ ॥}

চোলসিংহপুর

কৌসল্যা সুপ্রজা রাম! পূর্বা সন্ধ্যা প্রবর্ততে ।

উত্তিষ্ঠ নরশার্দূল! কর্তব্যং দৈবমাহ্নিকম্ ॥ ১॥

উত্তিষ্ঠোত্তিষ্ঠ গোবিন্দ! উত্তিষ্ঠ গরুডধ্বজ! ।

উত্তিষ্ঠ কমলাকান্ত! ত্রৈলোক্যং মঙ্গলং কুরু ॥ ২॥

মাতঃ সুধাফললতে! মহনীযশোভে!

বক্ষোবিহাররসিকে! নৃহরেরজস্রম্ ।

ক্ষীরাম্বুরাশিতনযে! শ্রিতকল্পবল্লি!

শ্রীমন্নৃসিংহদযিতে! তব সুপ্রভাতম্ ॥ ৩॥

তব সুপ্রভাত-মনবদ্য-বৈভবে!

ঘটিকেশ-সদ্গুণ-নিবাস-ভূতলে ।

ঘটিতাখিলার্থ-ঘটিকাদ্রিশেখরে

ঘটিকাদ্রিনাথ-দযিতে! দযানিধে ॥ ৪॥

অত্র্যাদিকা মুনিগণা বিরচয্য সন্ধ্যাং

দিব্যস্রবন্মধুঝরীক সরোরুহাণি ।

পাদার্পণায পরিগৃহ্য পুরঃ প্রপন্নাঃ

শ্রীমন্নৃসিংহ বিজযীভব সুপ্রভাতম্ ॥ ৫॥

সপ্তর্ষিসঙ্ঘকৃত সন্তুতি-সুপ্রসন্ন

শ্রীমন্নৃসিংহ গুণরূপ রমামহীভ্যাম্ ।

সাকং নৃসিংহগিরি-সত্ত্বকৃতাধিবাস

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ৬॥

প্রহ্লাদরক্ষণ-নিদান-কৃতাবতার!

মুগ্ধস্বকীযনখরঈঃ স্পুটিতারিবক্ষঃ ।

সর্বাভিবন্দ্য-নিজবৈভব-চন্দ্রকান্ত!

শ্রীমন্নৃসিংহ বিজযীভব সুপ্রভাতম্ ॥ ৭। ।

ভক্তোচিতাদিসরসঃ সুগুণং প্রকৃষ্টং

তীর্থং সুবর্ণঘট-পূরিতমাদরেণ ।

ধৃত্বা শ্রুতিপ্রবচনৈকপরা লসন্তি

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ৮। ।

সংশ্লাঘনীয-পরমোত্তর-রঙ্গবাসি-

সূরি-স্তুতি-প্রথিতবিগ্রহ-কান্তিকান্ত!

সদ্ভিঃ-সমর্চিত-পদাম্বুজ! সাধুরক্ষিন্

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ৯॥

তীর্থানি গোমুখগতান্যখিলানি ধৃত্বা

ভব্যানি ভব্যনিকরাঃ পরিতো লসন্তি ।

গাযন্তি গানচতুরাঃ তব দিব্যবৃত্তং

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ১০॥

বারাণাসী-প্রথিত-বিষ্ণুপদী-প্রযাগ-

বিখ্যাত-বিশ্বনত-সদ্ঘ্টিকাচলেন্দ্র!

সংপ্রার্থিতার্থ-পরিদান-কৃতৈকদীক্ষ!

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ১১॥

পার্শ্বদ্বযস্থিত- রমামহিশোভমান!

শ্রীচোলসিংহপুর-ভাগ্যকৃতাবতার!

স্বামিন্! সুশীল-সুলভাশ্রিতপারিজাত!

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ১২॥

শ্রীশ্রীনিবাস-ঘনদেশিকবর্য-ভক্তি-

সংবর্ধিত-প্রতিদিনোৎসব-শোভমান ।

কল্যাণচেল-কনকোজ্জ্বলভূষণাঢ্য!

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ১৩॥

শ্রীব্রহ্মতীর্থতটমাগতমঞ্জনাভং

দেবং প্রণম্য বরদং ঘটিকাদ্রিমেত্য ।

বাধূল-মানিধি-মহাগুরেষ আস্তে

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ১৪॥

আচার্যপূরুষবরা হ্যভিরামবৃদ্ধা

অর্হাভিপূজ্যতর-মঙ্গলবস্তুহস্তাঃ ।

ত্বৎপাদপঙ্কজ-সিষেবিষযা প্রপন্নাঃ

শ্রীমন্নৃসিংহ! বিজযীভব সুপ্রভাতম্ ॥ ১৫॥

শ্রীমন্নৃসিংহ-গিরি-শেখর-সুপ্রভাতং

যে মানবাঃ প্রতিদিনং পঠিতুং প্রবৃত্তাঃ ।

তেভ্যঃ প্রসন্নবদনঃ কমলাসহাযঃ

সর্বাণি বাঞ্ছিতফলানি দদাতি কামম্ ॥ ১৬॥

॥ ইতি শ্রী যোগলক্ষ্মীনরসিংহস্ম সুপ্রভাতম্ ॥

COMMENTS:-

This poem is addressed to Lord LakShmi Narasimha at the temple in Cholasimhapuram - popularly known as Sholingapuram. The place is about 125 km. from Chennai, the capital of Tamilnadu state. It is also known as Ghatikachalam. The Lord has been sung by vaishnavite devotees known as Alwars. There are two hills in the village. The taller one has the temple of Shri LakShmi Narasimha. On the smaller hill we can have the darshan of Anjaneya. The village is surrounded by lush green forests which are said to

contains medicinal herbs. So, a stay in this place to have darshan of the Lord is conducive to both spiritual and physical well-being. It is said that after the Lord appeared to cofirm His devotee Prahlada's assertion that He is present every where and in everything and killed the demon king Hiranyakashipu He was about to wind up the act. The sages who were assembled there to witness the unique event were immensely moved by Lord's grace and His wonderful form . The Bhagavata Purana describes the form as most wonderful.অদৃশ্যাত অত্যদ্ভুতরূপং উদ্বহন্ স্তংবে সভাযাং ন মৃগং ন মানুষম্। Please note the use of the word অত্যদ্ভুত রূপম্ "most wonderful" to describe the form of Narasimha. The Purana does not use such an adjective to describe any other of Lord's avatara includong that of Shri Krishna which the Purana covers at great length. Krishna, at His birth, is described as just অদ্ভুতং বালকং (i.e.) wonderful child. This shows the uniqness of Narasimha avatar. So, the sages who have the welfare of others always in their heart requested the Lord to make available His form for the benefit of all. The kindly Lord acceded to their request and stayed in this place Sholingapuram. This is a place of pilgrimage and is visited regularly by large number of people.

Encoded and proofread N.Balasubramanian bbalu@sify.com

Please send corrections to sanskrit@cheerful.com

Last updated ঢ়oday

http://sanskritdocuments.org

Yoga (Ghatikachala) Lakshmi Narasimha Suprabhatam Lyrics in Bengali PDF
% File name : yogalakShmInarasimhasurabhAtam.itx
% Category : suprabhAta
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : June 25, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website